# Ribhuproktam Aham Brahmasmyaham Mantranirupanam

# ઋભુપ્રોક્તં અહં બ્રહ્માસ્મ્યહં મન્ત્રનિરૂપણમ્

## Document Information

Text title : Ribhuproktam Aham Brahmasmyaham Mantranirupanam

File name : RRibhuproktaMahaMbrahmAsmyahaMmantranirUpaNam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 9 | 49(2)-63||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

# ઋભુપ્રોક્તં અહં બ્રહ્માસ્મ્યહં મન્ત્રનિરૂપણમ્

અહં બ્રહ્માસ્મ્યહં મન્ત્રઃ સ્વાત્મપાપં વિનાશયેત્ ॥ ૯.૪૯॥

અહં બ્રહ્માસ્મ્યહં મન્ત્રો દ્વૈતદોષં વિનાશયેત્ ।
અહં બ્રહ્માસ્મ્યહં મન્ત્રો ભેદદુઃખં વિનાશયેત્ ॥ ૯.૫૦॥

અહં બ્રહ્માસ્મ્યહં મન્ત્રશ્ચિન્તારોગં વિનાશયેત્ ।
અહં બ્રહ્માસ્મ્યહં મન્ત્રો બુદ્ધિવ્યાધિં વિનાશયેત્ ॥ ૯.૫૧॥

અહં બ્રહ્માસ્મ્યહં મન્ત્ર આધિવ્યાધિં વિનાશયેત્ ।
અહં બ્રહ્માસ્મ્યહં મન્ત્રઃ સર્વલોકં વિનાશયેત્ ॥ ૯.૫૨॥

અહં બ્રહ્માસ્મ્યહં મન્ત્રઃ કામદોષં વિનાશયેત્ ।
અહં બ્રહ્માસ્મ્યહં મન્ત્રઃ ક્રોધદોષં વિનાશયેત્ ॥ ૯.૫૩॥

અહં બ્રહ્માસ્મ્યહં મન્ત્રશ્ચિન્તાદોષં વિનાશયેત્ ।
અહં બ્રહ્માસ્મ્યહં મન્ત્રઃ સઙ્કલ્પં ચ વિનાશયેત્ ॥ ૯.૫૪॥

અહં બ્રહ્માસ્મ્યહં મન્ત્રઃ ઇદં દુઃખં વિનાશયેત્ ।
અહં બ્રહ્માસ્મ્યહં મન્ત્રઃ અવિવેકમલં દહેત્ ॥ ૯.૫૫॥

અહં બ્રહ્માસ્મ્યહં મન્ત્રઃ અજ્ઞાનધ્વંસમાચરેત્ ।
અહં બ્રહ્માસ્મ્યહં મન્ત્રઃ કોટિદોષં વિનાશયેત્ ॥ ૯.૫૬॥

અહં બ્રહ્માસ્મ્યહં મન્ત્રઃ સર્વતન્ત્રં વિનાશયેત્ ।
અહં બ્રહ્માસ્મ્યહં મન્ત્રો દેહદોષં વિનાશયેત્ ॥ ૯.૫૭॥

અહં બ્રહ્માસ્મ્યહં મન્ત્રઃ દૃષ્ટાદૃષ્ટં વિનાશયેત્ ।
અહં બ્રહ્માસ્મ્યહં મન્ત્ર આત્મજ્ઞાનપ્રકાશકમ્ ॥ ૯.૫૮॥

અહં બ્રહ્માસ્મ્યહં મન્ત્ર આત્મલોકજયપ્રદમ્ ।
અહં બ્રહ્માસ્મ્યહં મન્ત્ર અસત્યાદિ વિનાશકમ્ ॥ ૯.૫૯॥

અહં બ્રહ્માસ્મ્યહં મન્ત્રઃ અન્યત્સર્વં વિનાશયેત્ ।

અહં બ્રહ્માસ્મ્યહં મન્ત્ર અપ્રતર્ક્યસુખપ્રદમ્ ॥ ૯.૬૦॥

અહં બ્રહ્માસ્મ્યહં મન્ત્રઃ અનાત્મજ્ઞાનમાહરેત્ ।
અહં બ્રહ્માસ્મ્યહં મન્ત્રો જ્ઞાનાનન્દં પ્રયચ્છતિ ॥ ૯.૬૧॥

સપ્તકોટિમહામન્ત્રા જન્મકોટિશતપ્રદાઃ ।
સર્વમન્ત્રાન્સમુત્સૃજ્ય જપમેનં સમભ્યસેત્ ॥ ૯.૬૨॥

સદ્યો મોક્ષમવાપ્નોતિ નાત્ર સન્દેહમસ્તિ મે ।
મન્ત્રપ્રકરણે પ્રોક્તં રહસ્યં વેદકોટિષુ ॥ ૯.૬૩॥

યઃ શ◌ૃણોતિ સકૃદ્વાપિ બ્રહ્મૈવ ભવતિ સ્વયમ્ ।

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋભુપ્રોક્તં અહં બ્રહ્માસ્મ્યહં મન્ત્રનિરૂપણં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । અધ્યાયઃ ૯ । ૪૯(૨)-૬૩॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 9 . 49(2)-63..

Notes :
There is numbering error in the source text from shloka 43 onwards.
Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita.
Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

*Ribhuproktam Aham Brahmasmyaham Mantranirupanam*
pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*